| | |
|---|---|
| 1.28.a | ध्रुवमसि पृथिवी न्दृꣳह ।। |
| 1.28.b | ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि द्विषतो वधाय ।।२।। |
| 1.29.a | अग्ने ब्रह्म गृभ्णीष्व धरुणमस्यन्तरिक्षं दृꣳह । |
| 1.29.b | ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि द्विषतो वधाय । |
| 1.29.c | धर्त्रमसि दिव न्दृꣳह । |
| 1.29.d | ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि द्विषतो वधाय ।।३।। |
| 1.30.a | विश्वाभ्यस्त्वाऽऽशाभ्य उपदधामि द्विषतो वधाय। |
| 1.30.b | चित स्थोर्ध्वचितो भृगूणामङ्गिरसां तपसा तप्यध्वम् ।।४।।(६) |

| | |
|---|---|
| 1.31.a | शर्मास्यवधूतꣳ रक्षोऽवधूता अरातय : । |
| 1.31.b | अदित्यास्त्वगसि प्रति त्वाऽदितिर्वेत्तु ।।१।। |
| 1.32.a | धिषणाऽसि पर्वती प्रति त्वाऽदित्यास्त्वग्वेत्तु । |
| 1.32.b | दिवस्कम्भन्यसि धिषणाऽसि पार्वतेयी प्रति त्वा पर्वती वेत्तु ।।२।। |
| 1.33.a | धान्यमसि धिनुहि देवान् धिनुहि यज्ञं धिनुहि यज्ञपतिम् । |
| 1.33.b | धिनुहि माँ यज्ञन्यम् ।।३।। |
| 1.34.a | प्राणाय त्वोदानाय त्वा व्यानाय त्वा । |

ध्रुवम् । असि । पृथिवीम् । दृ९ह । ब्रह्मवनीति ब्रह्म = वनि । त्वा । क्षत्रवनीति क्षत्र = वनि । सजातवनीति सजात = वनि । उप । दधामि । द्विषत : । वधाय ।।२।। अग्ने । ब्रह्म । गृभ्णीष्व । धरुणम् । असि । अन्तरिक्षम् । दृ९ह । ब्रह्मवनीति ब्रह्म = वनि । त्वा । क्षत्रवनीति क्षत्र = वनि । सजातवनीति सजात = वनि । उप । दधामि । द्विषत : । वधाय । धर्त्रम् । असि । दिवम् । दृ९ह । ब्रह्मवनीति ब्रह्म = वनि । त्वा । क्षत्रवनीति क्षत्र = वनि । सजातवनीति सजात = वनि । उप । दधामि । द्विषत : । वधाय ।।३।। विश्वाभ्य : । त्वा । आशाभ्य : । उप । दधामि । द्विषत : । वधाय । चित : । स्थ । ऊर्ध्वचित इत्यूर्ध्व = चित : । भृगूणाम् । अङ्गिरसाम् । तपसा । तप्यध्वम् ❋।।४।।६।।६६-१८=४८।।

शर्म । असि । अवधूत मित्यव = धूतम् । रक्ष : । अवधूता इत्यव = धूता : । अरातय : । अदित्या : । त्वक् । असि । प्रति । त्वा । अदिति : । वेत्तु ।।१।। धिषणा । असि । पर्वती । प्रति । त्वा । अदित्या : । त्वक् । वेत्तु । दिव : । स्कम्भनी । असि । धिषणा । असि । पार्वतेयी । प्रति । त्वा । पर्वती । वेत्तु ।।२।। धान्यम् । असि । धिनुहि । देवान् । धिनुहि । यज्ञम् । धिनुहि । यज्ञपति मिति यज्ञ = पतिम् । धिनुहि । माम् । यज्ञन्यमिति यज्ञ = न्यम् ।।३।। प्राणाय । त्वा । उदानायेत्युत् = आनाय । त्वा । व्यानायेति वि = आनाय । त्वा ।

| | |
|---|---|
| 1.34.b | दीर्घामनु प्रसितिमायुषे धान्देवो व : सविता प्रतिगृह्णातु<br>हिरण्यपाणिरच्छिद्रेण पाणिना । |
| 1.34.c | चक्षुषे त्वा महीनां पयोऽसि ।।४।। |
| 1.35.a | वेदोऽसि वेद येन त्वं देव वेद देवेभ्यो वेदोऽभव : । |
| 1.35.b | तेन मह्यँ वेदो भव ।।५।।(७) |

| | |
|---|---|
| 1.36.a | देवस्य त्वा सवितु : प्रसवेऽश्विनो र्बाहुभ्याम् पूष्णो हस्ताभ्याम् । |
| 1.36.b | सँ वपामि समाप ओषधीभि : समोषधयो रसेन । |
| 1.36.c | स९ रेवतीर्जगतीभि : सं मधुमतीर्मधुमतीभि : पृच्यन्ताम् । |
| 1.36.d | जनयत्यै त्वा सँ यौमि ।।१।। |
| 1.37.a | इद मग्ने रिद मग्नीषोमयो रिषे त्वा । |
| 1.37.b | घर्मोऽसि विश्वायुरुरुप्रथा उरु प्रथस्वोरु ते यज्ञपति : प्रथताम् ।।२।। |
| 1.38.a | अग्निष्टे त्वचं मा हि९सी दन्तरित९ रक्षोऽन्तरिता अरातय : । |
| 1.38.b | देवस्त्वा सविता श्रपयतु वर्षिष्ठेऽधि नाके ।।३।। |
| 1.39.a | मा भेर्मा सँ विक्था अतमेरुर्यज्ञोऽतमेरुर्यजमानस्य प्रजा भूयात् ।। |
| 1.39.b | त्रिताय त्वा द्विताय त्वैकताय त्वा ।।४।।(८) |

दीर्घाम् । अनु । प्रसितिं मिति प्र = सितिम् । आयुषे । धाम् । देव : । व : । सविता । प्रति । गृण्हातु । हिरण्यपाणि रिति हिरण्य = पाणि : । अच्छिद्रेण । पाणिना ✻। चक्षुषे । त्वा । महीनाम् । पय : । असि ।।४।। वेद : । असि । वेद । येन । त्वम् । देव । वेद । देवेभ्य : । वेद : । अभव : । तेन । मह्यम् । वेद : । भव ✻।।५।।७।।८०-२३=५७।।

देवस्य । त्वा । सवितु : । प्रसव इति प्र = सवे । अश्विनो : । बाहुभ्या मिति बाहु = भ्याम् । पूष्ण : । हस्ताभ्याम् । सम् । वपामि । सम् । आप : । ओषधीभि : । सम् । ओषधय : । रसेन । सम् । रेवती : । जगतीभि : । सम् । मधुमती रिति मधु = मती : । मधुमतीभि रिति मधु = मतीभि : । पृच्यन्ताम् । जनयत्यै । त्वा । सम् । यौमि ।।१।। इदम् । अग्ने : । इदम् । अग्नीषोमयो : । इषे । त्वा । घर्म : । असि । विश्वायु रिति विश्व = आयु : । उरुप्रथा इत्युरु = प्रथा : । उरु । प्रथस्व । उरु । ते । यज्ञपति रिति यज्ञ = पति : । प्रथताम् ।।२।। अग्नि : । ते । त्वचम् । मा । हि॑सीत् । अन्तरित मित्यन्त : = इतम् । रक्ष : । अन्तरिता इत्यन्त : = इता : । अरातय : । देव : । त्वा । सविता । श्रपयतु । वर्षिष्ठे । अधि । नाके ।।३।। मा । भे : । मा । सम् । विक्था : । अतमेरु : । यज्ञ : । अतमेरु : । यजमानस्य । प्रजेति प्र = जा । भूयात् । त्रिताय । त्वा । द्विताय । त्वा । एकताय । त्वा ✻।।४।।८।।७६-१०=६६।।